# Mahadeva Stuti Varapraptyartham Parvatikrita

# મહાદેવસ્તુતિઃ વરપ્રાપ્ત્યર્થં પાર્વતિકૃતા

## Document Information

Text title : Mahadeva Stuti Varapraptyartham Parvatikrita

File name : mahAdevastutiHvaraprAptyarthaMpArvatikRRitA.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2021

*sanskritdocuments.org*

Mahadeva Stuti Varapraptyartham Parvatikrita

# મહાદેવસ્તુતિઃ વરપ્રાપ્ત્યર્થં પાર્વતિકૃતા

(સૌરપુરાણે ૫૪-અધ્યાયાન્તર્ગતમ્)

દેવ્યુવાચ -
બાલેતિ મત્વા ભવ ભૂતનાથ વ્યામોહ(વ્યામુહ્ય)સે કિં ત્વમનિન્દ્યવર્ય ।
સ્વતન્ત્રવૃત્તિર્યદિ વા તવૈષા તદા દહેર્મામપિ ચાગ્રસંસ્થામ્ ॥ ૫॥

યદિ વિશ્વેશ્વરો દેવો બ્રહ્માદીનાં હરઃ શિવઃ ।
પ્રતારણે પ્રવૃત્તશ્ચેત્કો નિવારયિતું ક્ષમઃ ॥ ૬॥

નાહં પ્રતાર્યા ભગવંસ્ત્વામહં શરણં ગતા ।
ગતિર્નાન્યાઽસ્તિ મે દેવ તસ્માન્માં ત્રાતુમર્હસિ ॥ ૭॥

ત્વમેવ ચક્ષુર્જગતસ્ત્વમેવ વચસાં પતિઃ ।
ત્વમેવ ધાતા જગતો વિધાતા વિશ્વતોમુખઃ ॥ ૮॥

નમામ્યહં દેવવરં પુરાણમુપેન્દ્રવેધોઽમરરાજજુષ્ટમ્ ।
શશાઙ્કસૂર્યાગ્નિમયં ત્રિનેત્રં ધ્યાનાધિગમ્યં જગતઃ પ્રકાશમ્ ॥ ૯॥

ત્વાં વાઙ્મયાધારમનન્તવીર્યં જ્ઞાનાર્ણવં ચૈવ ગુણાર્ણવં ચ ।
પરાપરં ધામનિધિં સુસૂક્ષ્મમનાદિમધ્યાન્તવિહીનરૂપમ્ ॥ ૧૦॥

હિરણ્યગર્ભં જગતઃ પ્રસૂતિં નમામિ દેવં હરિણાઙ્કચિહ્નમ્ ।
પિનાકપાશાઙ્કુશશૂલહસ્તં કપર્દિનં મેઘસહસ્રઘોષમ્ ॥ ૧૧॥

તમાલકણ્ઠં સ્ફટિકાવદાતં નમામિ શમ્ભું ભુવનૈકસિંહમ્ ।
દશાર્ધવક્ત્રં સુરસિન્ધુશીર્ષં શશાઙ્કચિહ્નં નરસિંહદારુણમ્ ॥ ૧૨॥

ત્વાં નમામિ શરભરૂપધરોરગેન્દ્રરાજહારં ચલદ્વલયભૂષણં હરમ્ ।
વરવિબુધમુકુટાર્ચિતાઙ્ઘ્રિં નમામિ હિ હરિચર્મવસનં ત્વામ્ ॥ ૧૩॥

યદક્ષરં નિર્ગુણમપ્રમેયં યજ્જ્યોતિરેકં પ્રવદન્તિ સન્તઃ ।
દૂરઙ્ગમં દેવમનન્તમૂર્તિં નમામિ સૂક્ષ્મં પરમં પવિત્રમ્ ॥ ૧૪॥

નમામિ રુદ્રં પ્રમથાધિનાથં ધર્માસનસ્થં પ્રકૃતિદ્વયસ્થમ્ ।
તેજોનિધિં બાલશશાઙ્કમૌલિં કાલેન્ધનં વહ્નિરવીન્દુનેત્રમ્ ॥ ૧૫॥

ઇતિ સૌરપુરાણે ચતુષ્પઞ્ચાશોઽધ્યાયાન્તર્ગતં વરપ્રાપ્ત્યર્થં
પાર્વતિકૃતા મહાદેવસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by PSA Easwaran

*Mahadeva Stuti Varapraptyartham Parvatikrita*

pdf was typeset on December 11, 2021

Please send corrections to *sanskrit@cheerful.com*